Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 23

No. of Printed Pages – 11

S-71-Sanskritam (T.L.)

यहाँ से काटिए

# माध्यमिक परीक्षा, 2022

# SECONDARY EXAMINATION, 2022

## तृतीय भाषा – संस्कृतम्

समय : 2.45 (पादोनहोरात्रयम्)

अधिकतमांका : 80

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

**परीक्षार्थिभ्य: सामान्यनिर्देशा :**

1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्क: अनिवार्यत: लेख्य: ।

2) सर्वे प्रश्ना: अनिवार्या: ।

3) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

यहाँ से काटिए

FOR OTHER SUBJECT - CLICK HERE

## खण्ड – अ

प्र.1) अधोलिखितप्रश्नानाम् उचितं विकल्पं चित्वा लिखत –

i) अनिशं कालायसचक्रं कुत्र प्रचलति? [1]

अ) महासागरमध्ये ब) महावनमध्ये

स) महानगरमध्ये द) ग्राममध्ये

ii) सर्वदा सर्वकार्येषु का बलवती भवति? [1]

अ) बुद्धिमती ब) बुद्धिः

स) भामिनी द) शक्तिः

iii) 'शुचिपर्यावरणम्' इति पाठः कस्मात् ग्रन्थात् संकलितः? [1]

अ) लसल्लतिकातः ब) ऋग्वेदसंहितातः

स) चरकसंहितातः द) सामवेद संहितातः

iv) बालभावात् शिवस्य मस्तके कः विराजते? [1]

अ) लवः ब) कुशः

स) हिमकरः द) कृष्णनागः

v) दुर्बलः वृषभः कुत्र पपात? [1]

अ) वने ब) क्षेत्रे

स) गृहे द) ग्रामे

vi) वानरः कस्य पुच्छं धुनाति? [1]

अ) सिंहस्य ब) पिकस्य

स) काकस्य द) मयूरस्य

vii) वस्तुतः चौरः कः आसीत्? [1]

अ) अतिथिः ब) गृही

स) न्यायाधीशः द) आरक्षी



FOR OTHER SUBJECT - CLICK HERE

viii) प्राणिनां लाभः केन जायते? 'सौहार्दं प्रकृतेः शोभा' पाठानुसारेण – [1]

अ) अत्यधिकपरिश्रमेण

ब) अत्यधिकधनार्जनेन

स) अन्योन्यसहयोगेन

द) अन्यस्य धनमपहरणेन

ix) नराणां प्रथमः शत्रुः कः? [1]

अ) सर्पः

ब) सिंहः

स) लोभः

द) क्रोधः

x) कस्मिन् सुते मातुः अधिका कृपा भवति? [1]

अ) सुन्दरसुते

ब) दुर्बले सुते

स) बलिष्ठे सुते

द) कनिष्ठे सुते

xi) व्यायामः कदा पथ्यः भवति? [1]

अ) सदा

ब) यदा कदा

स) केवलं शीते

द) केवलं वसन्ते

xii) बुद्धिमती गहनकानने कं ददर्श? [1]

अ) सिंहम्

ब) चौरम्

स) वानरम्

द) व्याघ्रम्

प्र.2) अ) समुचितविभक्तिप्रयोगेण रिक्तस्थानं पूरयत –

i) शिक्षकः .......... सह गीतं गायति । (छात्रशब्दः) [1]

ii) पिता .......... क्रुध्यति । (पुत्रशब्दः) [1]

ब) कोष्ठके प्रदत्तशब्दस्य समुचितं रूपं निर्माय रिक्तस्थानं पूरयत –

i) .......... भक्तिः रोचते । (हरि) [1]

ii) .......... अभितः छात्राः सन्ति । (गुरु) [1]

स) कोष्ठके प्रदत्तप्रकृतिप्रत्ययाभ्यां पदं निर्माय वाक्यं पूरयत –

i) नित्यं पाठं .......... । (पठ् + अनीयर्) [1]

ii) शक्तिःसदा .......... भवति । (बल + मतुप्) [1]



FOR OTHER SUBJECT - CLICK HERE

प्र.3) अ) अधोलिखितम् अपठितगद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –[10 × 1 = 10]

स्त्रियो हि मातृशक्तेः प्रतीकभूताः भवन्ति। सुगृहिणी तदैव सा सम्भवति यदा सुशिक्षिता स्यात् । अतः स्त्रीणां कृते शिक्षायाः परमावश्यकता वर्तते । गृहस्य सुशिक्षिता स्त्री सद्गृहिणी, गृहलक्ष्मीः गृहस्वामिनी वा भवति, सैव मातृभूता सद्वंशं सन्नागरिकं च निर्मातुं प्रभवति। स्त्री समाजे धार्मिकसंस्काराणां सद्गुणादिकानां स्थापनां करोति । अतः समाजे राष्ट्रे वा स्त्रीणां समादरो मातृशक्तेश्च गौरवरक्षणं तदैव सम्भवति यदा ताः सुशिक्षिताः स्युः । केनापि उक्तश्च –

'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।'

i) उपर्युक्तगद्यांशस्य समुचितं शीर्षकं लिखत ।

ii) मातृशक्तेः प्रतीकभूताः काः भवन्ति?

iii) स्त्रीणां कृते कस्याः परमावश्यकता वर्तते?

iv) देवताः कुत्र रमन्ते?

v) 'स्त्रीणां कृते शिक्षायाः आवश्यकता वर्तते।' अत्र वर्तते क्रियायाः कर्तृपदं किम्

vi) 'सुशिक्षिता स्त्री' इत्यनयो पदयोः विशेषणपदं किम्?

vii) 'यदा ताः सुशिक्षिताः स्युः।' अत्र ताः इति सर्वनामपदं कस्य संज्ञापदस्य स्थाने प्रयुक्तम्?

क) देवताः इत्यस्य

ख) राष्ट्रः इत्यस्य

ग) स्त्रियः इत्यस्य

घ) समाजः इत्यस्य

viii) 'अनादरः' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत ।

ix) 'सद्वंशः' इति पदस्य हिन्दी अर्थः कः?

x) 'करोति' इति पदे धातु–लकार–पुरुष–वचनं लिखत ।

ब) i) कस्य मांसं स्थिरीभवति?

[1]

अथवा

शतशकटीयानं किं मुञ्चति?

ii) 'शिशुलालनम्' पाठः कस्मात् ग्रन्थात् संकलितः?

[1]

अथवा

'विचित्रः साक्षी' पाठानुसारेण न्यायाधीशस्य नाम किम्?



FOR ALL BOARD PAPER - CLICK HERE

## खण्ड – ब

**लघूत्तरात्मकप्रश्नाः –**

प्र.4) अधोलिखितपदयोः सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखत –

i) मनोहरः [1]

ii) वागीशः [1]

प्र.5) अधोलिखितयोः सन्धिं कृत्वा सन्धेः नामापि लिखत –

i) नमः + ते [1]

ii) हरिम् + वन्दे [1]

प्र.6) अधोलिखितरेखाङ्कितपदयोः विग्रहं कृत्वा समासस्य नामापि लिखत –

i) बालकः <u>प्रतिदिनं</u> विद्यालयं गच्छति । [1]

ii) <u>दशाननः</u> लङ्कायाः राजा आसीत् । [1]

प्र.7) अधोलिखितरेखाङ्कितपदयोः समासं कृत्वा समासस्य नामापि लिखत –

i) <u>महान् पुरुषः</u> सर्वदा श्रेष्ठं कार्यं करोति । [1]

ii) <u>माता च पिता च</u> पूजनीयौ स्तः । [1]

प्र.8) अधोलिखितपदयोः उपसर्गं शब्दं च पृथक् पृथक् कृत्वा लिखत –

i) निर्बलः [1]

ii) आगमनम् [1]

प्र.9) मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखत –

i) अहम् ............... ग्रामं गच्छामि । (इति, अपि, बहिः) [1]

ii) सः गायकः ........... गीतं गायति । (मा, उच्चैः पुरा) [1]



FOR ALL BOARD PAPER - CLICK HERE

प्र.10) अधोलिखितौ संख्यावाचिशब्दौ संस्कृते लिखत –

i) 150 [1]

ii) 1025 [1]

प्र.11) अधोलिखितवाक्ययो: रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत –

i) उद्यमेन सम: बन्धु: नास्ति । [1]

ii) समीपे एका नदी वहति । [1]

प्र.12) अधोलिखितस्य श्लोकस्य अन्वयं कुरुत – [2]

सेवितव्यो महावृक्ष: फलच्छायासमन्वित: ।

यदि दैवात् फलं नास्ति छाया केन निवार्यते ॥

प्र.13) अधोलिखितवाक्ययो: शुद्धं कृत्वा लिखत –

i) स: नेत्रात् काण: अस्ति । [1]

ii) राजा भिक्षुकं वस्त्राणि यच्छति । [1]

प्र.14) स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत यद् अस्मिन् प्रश्नपत्रे न स्यात् । [1 + 1 = 2]

प्र.15) 'बुद्धिर्बलवती सदा' इति कथाया: सारं हिन्दीभाषायां लिखत । [2]

प्र.16) अधोलिखितस्य पद्यांशस्य संस्कृतभाषायां भावार्थं लिखत – [2]

अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम् ।

अयोग्य: पुरुष: नास्ति, योजकस्तत्र दुर्लभ: ।

अथवा

व्यायामं कुर्वतो नित्यं, विरुद्धमपि भोजनम् ।

विदग्धमविदग्धं वा, निर्दोषं परिपच्यते ॥



FOR ALL BOARD PAPER - CLICK HERE

## खण्ड – स

प्र.17) अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषायाम् अनुवादं कुरुत – [3]

पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरं आसीत् । 'निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा', एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः । करुणापरो गृही तस्मै आश्रयं प्रायच्छत् ।

अथवा

"भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि । सः दीन इति जानन्नपि कृषकः तं वहुधा पीडयति । सः कृच्छ्रेण भारमुद्वहति । इतरमिव धुरं वोढुं सः न शक्नोति । एतत् भवान् पश्यति न? इति प्रत्यवोचत् ।

प्र.18) अधोलिखितस्य पद्यांशस्य सप्रसङ्गं हिन्दी भाषायाम् अनुवादं लिखत – [3]

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,

वली वलं वेत्ति न वेत्ति निर्वलः ।

पिको वसन्तस्य गुणं न वायसः,

करी च सिंहस्य बलं न मूषकः ।।

अथवा

हरिततरूणां ललितलतानां माला रमणीया ।

कुसुमावलिः समीरचालिता स्यान्मे वरणीया ।।

नवमालिका रसालं मिलिता रुचिरं संगमनम् ।

शुचि ............. ।।



FOR ALL BOARD PAPER - CLICK HERE

प्र.19) अधोलिखितस्य नाट्यांशस्य सप्रसङ्गं हिन्दीभाषायाम् अनुवादं लिखत – [3

राम: – एष भवतो: सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि – क्षत्रियकुलपितामहयो: सूर्यचन्द्रयो: को
भवतोर्वंशस्य कर्त्ता?

लव: – भगवान् सहस्रदीधिति: ।

राम: – कथमस्मत्समानाभिजनौ संवृत्तौ?

विदूषक: – किं द्वयोरप्येकमेव प्रतिवचनम्?

लव: – भ्रातरावावां सोदर्यौ ।

अथवा

मयूर: – अरे वानर ! तूष्णीं भव । कथं त्वं योग्य: वनराजपदाय? पश्यतु पश्यतु मम शिरसि राजमुकुट
शिखां स्थापयता विधात्रा एवाहं पक्षिराज: कृत:, अत: वने निवसन्तं मां वनराजरूपेणापि द्रष्टुं म
भवन्तु अधुना । यत: कथं कोऽप्यन्य: विधातु: निर्णयम् अन्यथा कर्तुं क्षम: ।

काक: – (सव्यङ्ग्यम्) अरे अहिभुक् । नृत्यातिरिक्तं का तव विशेषता यत् त्वां वनराजपदाय योग्यं मन्या
वयम् ।

प्र.20) क्रमरहितानां षड्वाक्यानां क्रमपूर्वकं संयोजनं कुरुत – [

i) मूषक: परिश्रमेण जालम् अकृन्तत् ।

ii) एकदा स: जाले बद्ध: ।

iii) सिंह: जालात् मुक्त: भूत्वा मूषकं प्रशंसन् गतवान् ।

iv) एकस्मिन् वने एक: सिंह: वसति स्म ।

v) स: सम्पूर्णं प्रयासम् अकरोत् परं बन्धनात् न मुक्त: ।

vi) तदा तस्य स्वरं श्रुत्वा एक: मूषक: तत्र आगच्छत् ।

अथवा

अधोलिखितेषु पञ्चशब्देषु केषन त्रयाणां शब्दानां प्रयोगं कृत्वा संस्कृते वाक्यनिर्माणं कुरुत –

प्रात:काले, चन्द्र:, नदी, पवन:, उद्यानम्



FOR ALL BOARD PAPER - CLICK HERE

## खण्ड – द

प्र.21) भवती राजकीय–उच्च–माध्यमिक–विद्यालय–चन्द्रपुरस्य दशम्याः कक्षायाः छात्रा रेवती अस्ति । भवती रुग्णा, अतः स्वप्रधानाचार्याय दिनद्वयस्य रुग्णतावकाशार्थं प्रार्थनापत्रं लिखतु । [4]

अथवा

भवान् योगेन्द्रः । स्वकीयं मित्रं देवेन्द्रं प्रति ग्रीष्मावकाशे भ्रमणविषये अधोलिखितपत्रं मंजूषापदसहायतया पूरयित्वा लिखत –

| |
|---|
| प्रस्तावः, प्रबलेच्छा, सादरप्रणामः, कुशलतां, आनन्दानुभवं<br>हिमाचलप्रदेशं, शीघ्रमेव, मातृपितृभ्यां |

ज्वालापुरतः

दिनांक : 24.04.2022

प्रियमित्र देवेन्द्र !

नमस्ते।

अत्र अहं कुशलः, भवतः ………… कामये ।

अहं ………… सह अस्मिन् ग्रीष्मावकाशसमये भ्रमणार्थं ………… गमिष्यामि । भवान् अपि अस्माभिः सह तत्र चलतु इति मम ………… अस्ति । वयं सर्वे मिलित्वा ………… करिष्यामः । मदीयः अयं ………… भवते रोचते चेत्, ज्ञापयतु ।

परिवारे पूज्येभ्यो सर्वेभ्यो जनेभ्यो मम ………… निवेदनीयः । पत्रस्योत्तरं ………… प्रेषणीयम्

भवतः मित्रम्

योगेन्द्रः



FOR ALL BOARD PAPER - CLICK HERE

प्र.22 मञ्जूषायाः उपयुक्तपदानि चित्वा मातृपुत्रयोः मध्ये वार्तालापं पूरयत – [4

| पूर्वमेव, वस्तूनि, आपणं, त्वं, सायंकाले, किमर्थम्, मातुलः, विद्यालयस्य |
|---|

माता – व्योमकेश ! .............. किं करोषि?

व्योमकेशः – अहं मम ............ गृहकार्यं करोमि ।

माता – पुत्र गृहकार्यानन्तरम् ............ गत्वा ततः दुग्धं शाकफलानि च आनय ।

व्योमकेशः – अहं .......... पुस्तकं क्रेतुम् आपणं गमिष्यामि तदा दुग्धं शाकफलानि च आनेष्यामि ।

माता – सायंकाले न, त्वं तु .............. गत्वा आनय ।

व्योमकेशः – शीघ्रं ....................?

माता – अद्य तव .............. आगमिष्यति, अतः, भोजनं समयात् पूर्वमेव पक्ष्यामि ।

व्योमकेशः – मातुलः आगमिष्यति चेत् अहम् इदानीम् एव गत्वा ............. क्रीत्वा आगच्छामि ।

अथवा

चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन अष्टवाक्यानि निर्माय लिखत –

| वृक्षाः, वहति, हरिणाः, पिबन्ति, तडागः, कमलानि, सुगन्धः, खादति |
|---|





FOR ALL BOARD PAPER - CLICK HERE

प्र.23) अधोलिखितेषु वाक्येषु केषाञ्चन चतुर्णां वाक्यानां संस्कृत भाषया अनुवादं करोतु - [4 × 1 = 4]

i) बालक वेदमन्त्र पढता है ।

ii) छात्रा कलम से पत्र लिखती है ।

iii) मोहन राम के साथ जाता है ।

iv) विद्यालय के चारों ओर खेत हैं ।

v) रमेश सिंह से डरता है ।

vi) कवियों में कालिदास श्रेष्ठ है ।

FOR ALL BOARD PAPER - CLICK HERE